दिनाङ्क :- 10.11.2025

प्रात: - 06:55

## बिहार-विधानसभा-निर्वाचनस्य

बिहारविधानसभानिर्वाचनस्य द्वितीयान्तिमस्य च चरणाय प्रचारः ह्यः सायङ्काले समाप्तः। अस्मिन् चरणे श्वः विंशति मण्डलेषु प्रसृतेषु द्वाविंशत्यधिकैकशत विधानसभाक्षेत्रेषु मतदानं भविष्यति। षड्त्रिंशोत्तरैकशत महिला-प्रत्याशिभिः सह द्वयाधिक-त्रिशतोत्तरैके-सहस्र प्रत्याशिनां राजनैतिक-भाग्यस्य निर्णयः अस्मिन् चरणे सप्तति दशमलवोत्तर त्रिकोट्यधिकैः मतदातृभिः क्रियते। प्रचारस्य अन्तिमे दिने, एन्. डी. ए. तथा महाघटबन्धन् इत्येतयोः शीर्ष-प्रचारकाः वरिष्ठ-नेतारः च स्वपक्षस्य प्रत्याशिनां समर्थने मतदातृन् आकर्षयितुं अन्तिमप्रयासं कृतवन्तः। एतदतिरिच्य, श्वः आयोक्ष्यमाणानां अष्टविधानसभामण्डलेषु उप-निर्वाचनस्य प्रचारः अपि समाप्तः। एतेषु निर्वाचनक्षेत्रेषु जम्मू-काश्मीरस्य बडगाम-नगरोटा-मण्डले, राजस्थानस्य अन्ता-मण्डलम्, झारखण्डस्य घाटशिला-मण्डलम्, तेलङ्गाना-राज्यस्य जुबलि हिल्स-मण्डलम्, पञ्जाब्-राज्यस्य तरन तारन-मण्डलम्, मिजोराम्-राज्यस्य डम्पा-मण्डलम्, ओडिशा-राज्यस्य नुआपाडा-मण्डलम् च अस्ति। नवम्बर-मासस्य चतुर्दश दिनाङ्के बिहारविधानसभानिर्वाचनेन सहैव मतानां गणना भविष्यति।

## प्रधानमन्त्री-उत्तराखण्ड

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः देहरादून-नगरे उत्तराखण्ड-राज्यस्य स्थापनायाः रजतमहोत्सवम् संबोधितम्। सः चत्वारिंशोत्तरैकशताधिक अष्टसहस्र कोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनम्, शिलान्यासं च कृतवान्। एकं जनसमूहं सम्बोधयन् श्रीमोदी अवदत् यत्, उत्तराखण्डं विकासस्य नूतन-औन्नत्यं प्रति नेतुं द्वि-यन्त्र-सर्वकारः निरन्तरं कार्यं कुर्वन् अस्ति। सः अवदत् यत् उत्तराखण्डस्य स्थानीय-उत्पादाः 'वोकल् फ़ार् लोकल्' अभियानेन सह संयुज्यन्ते, राज्यस्य पञ्चदश कृषि-उत्पादाः च जी. आई. टैग प्राप्तवन्तः। श्रीमोदी अवदत् यत् उत्तराखण्डस्य नूतनचलच्चित्रनीतिः राज्ये चित्रीकरणम् सुलभतरं करोति, अपि च राज्यं विवाहस्थलरूपेण अपि द्रुतगत्या वर्धमाना अस्ति इति।

## राष्ट्रपति- अङ्गोला

राष्ट्रपतिः द्रौपदी मुर्मुः ह्यः लुआण्डा-नगरे अङ्गोला-देशस्य राष्ट्रपतिना जोआओ लौरेन्को इत्यनेन सह विस्तृतं द्वैपाक्षिकं चर्चां कृतवती। उभौ राष्ट्रौ मत्स्यपालनक्षेत्रे, जलीय कृषिक्षेत्रे, सागरीय संसाधनेषु, दूतावासविषयेषु च सहयोगं वर्धयितुं एम्. ओ. यू. इति सन्धि पत्राणां आदानप्रदानम् कृतवन्तौ। अन्ताराष्ट्रिय-बिग्-कैट-अलायन्स तथा वैश्विक जैवेन्धन गठबंधने सम्मिलितुं अङ्गोला-राष्ट्रस्य निर्णयस्य राष्ट्रपतिः मुर्मु वर्या स्वागतं कृतवती।

## बाइट-बी-प्रेज़्-फिसरीज 26

अवधेयं यत् राष्ट्रपतिः द्रौपदी मुर्मूः अंगोला-बोत्सवाना-देशयोः राजकीययात्रायां वर्तते। सा नवम्बर-मासस्य अष्टतः त्रयोदशदिनाङ्कपर्यन्तं प्रवर्तमानायां यात्रायाम्  अस्ति। सा श्वः मंगलवासरे अङ्गोला-देशस्य स्वातन्त्र्यस्य पंचाशत्तमे वार्षिकोत्सवे भागं ग्रहीष्यति। अस्य मासस्य एकादश तः त्रयोदश दिनाङ्कपर्यन्तं यात्रायाः द्वितीये चरणे राष्ट्रपतिः बोत्सवाना-देशे भविष्यति।

## शिवराज-ओडिशा

कृषकाणां आयं वर्धयितुं, पोषण-सुरक्षां सुनिश्चेतुं, राज्ये प्राकृतिककृषि-पद्धतीं प्रवर्धयितुं च प्रमुखकार्यक्रमेषु भागं ग्रहणाय केन्द्रीयकृषि-कृषक कल्याण-मन्त्री शिवराजसिंह-चौहानः अद्य ओडिशा-राज्यं गमिष्यति। कृषि-कृषक-कल्याण-मन्त्रालयेन एकस्मिन् विज्ञप्तौ उक्तं यत् मण्डिया-दिवसस्य अथवा मिलेट इति प्रियङ्गु-दिवसस्य कार्यक्रमस्य उद्घाटन-सत्रे श्रीचौहानः मुख्यातिथिरूपेण भागं ग्रहीष्यति। अस्मिन् अवसरे सः सम्पूर्णे राज्ये तथा देशस्य शेषेषु भागेषु प्रियङ्गुधान्यानां उत्पादनं, संस्करणं, उपभोगं च प्रोत्साहयितुं केन्द्रस्य उपक्रमान् प्रकाशयिष्यति। श्री चौहानस्य यात्रां ओडिशा-राज्ये सुस्थिरस्य आत्मनिर्भरस्य च कृषिकार्यस्य प्रगतिं प्रति महत्त्वपूर्णं सोपानम् इति मन्यते।